दु, ट् ओ न उपतापे। इति कविकल्पद्रुमः॥ (स्वां-परं-सकं-अकं च-अनिट्।) टु, दवथुः। ओ, दूनः। न, दुनोति। उपताप इहोपतप्तीभावः उपतप्तीकरणञ्च। मन्मथेन दुनोमीति जयदेवः। वर्णप्रकर्षे सति कर्णिकारं दुनोति निर्गन्धतया स्म चेतः। इति कालिदासः। इति दुर्गादासः॥

दुः, [र्] अ, निषेधः। दुःखम्। निन्दा। अवक्षेपणम्। इति दुर्गादासधृतपुरुषोत्तमदेवः॥

दुः, [स्] अ, दुःखभावनम्। कोपः। इति दुर्गादासधृतमेदिनी॥

दुःकूलः, पुं, (दुर्दुःखं तज्जनकं कूलं रोधो यस्मात्। एतदुत्पत्त्या तटस्य विघ्नत्वात् अस्य तथात्वम्।) चोरनामगन्धद्रव्यम्। इति राजनिर्घण्टः॥

दुःख, त् क तत्क्रतौ। इति कविकल्पद्रुमः॥ (अदन्त चुरां-परं-सकं-सेट्।) विसर्गमध्यः।

"काले तड़िल्लताजाले घनपीनपयोधरे।
कान्तः सर्व्वगुणोपेतो बालेन्दुः खे न लभ्यते॥"

इति विन्दुच्युतकम्। अस्यार्थः। तड़िल्लतासमूहवति घनस्थूलमेघे काले कमनीयः सर्व्वगुणोपेतो बालेन्दुः खे आकाशे न लभ्यते पक्षे हे बाले सर्व्वगुणोपेतः कान्तः पतिर्दुःखेन लभ्यते। दुःखयति दुःखापयति। मूर्द्धन्यषमध्यः। इति केचित्। तत्क्रतिर्दुःखकरणम्। इति दुर्गादासः॥

दुःखं, क्ली, (दुर् दुष्टं खनतीति। खन+डः। यद्वा, दुःखयतीति। दुःख+पचाद्यच्।) संसारः। इति त्रिकाण्डशेषः॥ (रोगः। यथा, भावप्रकाशे अर्शोरोगाधिकारे।

"भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः॥"
"दुःखै रोगैः।" इति तट्टीका॥) मनोधर्म्मविशेषः। न्यायमते आत्मगुणभेदः। तत् अधर्म्मजन्यं सचेतसां प्रतिकूलम्। इति भाषापरिच्छेदः॥ तत्पर्य्यायः। पीड़ा २ बाधा ३ व्यथा ४ आमनस्यम् ५ प्रसूतिजम् ६ कष्टम् ७ कृच्छ्रम् ८ आभीलम् ९। इत्यमरः।१।१०।३॥ अर्त्तिः १० आर्त्तिः ११ पीड़नम् १२ अवाधा १३ बाधनम् १४ आमनस्यम् १५ आमानस्यम् १६ विवाधनम् १७ पीड़ितम् १८ विहेठनम् १९। इति शब्दरत्नावली॥ *॥

"सुखं दुःखञ्च हर्षञ्च शोकञ्च मङ्गलालयम्।
मया दत्तञ्च तत्त्वञ्च योगिनामपि दुर्लभम्॥"

इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥ *॥

(दुःखन्तु आध्यात्मिकाधिदैविकाधिभौतिकभेदात् त्रिविधम्। यदुक्तं तत्त्वकौमुद्याम्। "दुःखत्रयाभिघातात्।" इति।

"दुःखानां त्रयं दुःखत्रयं तत् खलु त्रिविधं आध्यात्मिकमाधिभौतिकमाधिदैविकञ्च। तत्र आध्यात्मिकं द्विविधं शारीरं मानसञ्च। शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम्। मानसं कामक्रोधलोभमोहभयेर्षाविषादविषयाविशेषादर्शननिबन्धनम्। सर्व्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्। वाह्योपायसाध्यञ्च दुःखं द्वेधा आधिभौतिकमाधिदैविकञ्च। तत्र आधिभौतिकं मानुषपशुपक्षिसरीसृपस्थावरनिमित्तम्। आधिदैविकं यक्षराक्षसविनायकग्रहाद्यावेशनिबन्धनम्। तदेतत्प्रत्यात्मवेदनीयं दुःखं रजःपरिणामभेदो न शक्यते प्रत्याख्यातुम्। तदनेन दुःखत्रिकेणान्तःकरणवर्त्तिना चेतनाशक्तेः प्रतिकूलतयाभिसम्बन्धोऽभिघातः इति। एतावता प्रतिकूलवेदनीयत्वं जिज्ञासाहेतुरुक्तः॥")

"दुःखमेवं प्रवक्ष्यामि तच्छृणुष्व वसुन्धरे!।
उचितेनोपचारेण दुःखं मोक्षविनाशनम्॥
अहङ्कारकृतो नित्यं नरो मोहेन चावृतः।
ये मां नैव प्रपद्यन्ते ततो दुःखतरन्नु किम्॥
सर्व्वाशी सर्व्वविक्रेता नमस्कारविवर्ज्जितः।
ये च मां न प्रपद्यन्ते ततो दुःखतरन्नु किम्॥
सर्व्वान्नानि तु सिद्धानि पाकभेदन्तु कारयेत्।
अवैश्वदेवं नरोऽश्नन्ति तत्र दुःखतरन्नु किम्॥
प्राप्तकाले वैश्वदेवे दृष्टमतिथिमागतम्।
अदत्त्वा तस्य यो भुङ्क्ते तत्र दुःखतरन्नु किम्॥
असन्तुष्टस्तु वैभव्ये परदाराभिमर्द्दकः।
परोपतापी मन्दात्मा तत्र दुःखतरन्नु किम्॥
अकृत्वायुर्व्वलं कर्म्म गृहे संवसते नरः।
मृत्युकालवशं प्राप्तस्तत्र दुःखतरन्नु किम्॥
हस्त्यश्वरथयानानि गच्छमानानि पश्यति।
न वै तस्याग्रतः पृष्ठे तत्र दुःखतरन्नु किम्॥
अश्नन्ति पिष्टकं केचित् घृतशालिसमन्वितम्।
शुष्कान्नं केचिदश्नन्ति तत्र दुःखतरन्नु किम्॥
वरवस्त्रावृतां शय्यां समासेवन्ति भूषिताः।
केचित् तृणेषु शेरन्ते ततो दुःखतरन्नु किम्॥
विद्वान् कृती गुणज्ञश्च सर्व्वशास्त्रविशारदः।
केचिन्मूकाश्च दृश्यन्ते तत्र दुःखतरन्नु किम्॥
विद्यमाने धने केचित् कृपणा भोगवर्जिताः।
दरिद्रो जायते दाता तत्र दुःखतरन्नु किम्॥
पुरुषस्य द्वये भार्य्ये तयोरेका प्रशंसयेत्।
एकापि दुर्भगा तत्र ततो दुःखतरन्नु किम्॥
लब्ध्वा तु मानुषीं संज्ञां पञ्चभूतसमन्विताम्।
मामेव न प्रपद्यन्ते ततो दुःखतरन्नु किम्॥
लब्ध्वा ब्राह्मणभावन्तु ययो वर्णाः सुमध्यमे!।
पापकर्म्मरता स्युर्यत्ततो दुःखतरन्नु किम्॥
एतत्ते कथितं भद्रे! दुःखकर्म्म विनिश्चयम्।
सर्व्वभूतहितार्थाय यन्मया परिपृच्छसि॥"

इति वराहपुराणम्॥ *॥

दुःखदानि यथा,—
पारतन्त्र्यम् १ व्याधिः २ आधिः ३ मानच्युतिः ४ शत्रुः ५ कुभार्य्या ६ नैःस्वम् ७ कुग्रामवासः ८ कुस्वामिसेवनम् ९ बहुकन्या १० ऋणित्वम् ११ परगृहवासः १२ वर्षाप्रवासः १३ भार्य्याद्वयम् १४ कुपुत्त्रः १५ दुर्व्वचनकरणकलिः १६। इति कविकल्पलता॥ (तद्विशिष्टे, त्रि। इत्यमरः। १।४।२६॥ यथा, हरिवंशे। २२३। ४९।

"सुसुखा न च दुःखा वा न शीता न च घर्म्मदा॥")

दुःखदोह्या, स्त्री, (दुःखेन दुह्यते इति। दुह+"ऋहलोर्ण्यत्।" ३। ४। १२४। इति ण्यत्।) दुर्दोहगवी। तत्पर्य्यायः। करटा २। इति हेमचन्द्रः। ४। ३३५॥

दुःखितः, त्रि, (दुःखं सञ्जातमस्येति तारकादित्वादितच्।) यद्वा, दुःखधातोः कर्म्मणि क्तप्रत्ययः। दुःखी। (यथा, मनौ। ९। २८८।

"बन्धनानि च सर्व्वाणि राजमार्गे निवेशयेत्।
दुःखिता यत्र दृश्येरन् विकृताः पापकारिणः॥")

भावे क्ते, दुःखम्। तत्र क्ली॥

दुःखी, [न्] त्रि, (दुःखमस्यास्तीति इनिः।) दुःखान्वितः। दुःखितः। यथा,—

"दुःखिनोऽदुःखिनो वापि प्राणिनो लब्धचक्षुषः।
आत्मवत् परिपश्यन्ति ते यान्ति परमां गतिम्॥
त्यक्तात्मसुखभोगेच्छा सर्व्वसत्त्वसुखैषिणः।
भवन्ति परदुःखेन साधवो नित्यदुःखिताः॥"

इति वह्निपुराणे शिवेश्वराख्याननामाध्यायः॥)

दुःषमम्, अ, (दुर्दुष्टं समं यत्र। "तिष्ठद्गुप्रभृतीनि च।" इत्यव्ययीभावः। "सुविनिर्दुर्भ्यः सुपि।" ८। ३। ८८। इति षत्वम्।) निन्दनीयम्। तत्पर्य्यायः। निःषमम् २ गर्ह्यम् ३। इत्यमरः। ३। ४। १४॥

दुःषमम्, त्रि, (दुःषमम्। बाहुलकात् सत्वाभावः।) असमञ्जसम्। इति त्रिकाण्डशेषः॥

दुःसहा, स्त्री, (दुःखेन सह्यतेऽसौ। दुः+सह+खल्। टाप् च।) नागदमनी। इति राजनिर्घण्टः॥ (दुःसहे, त्रि। यथा, रघुः।११।२०।

"राममन्मथशरेण ताड़िता
दुःसहेन हृदये निशाचरी।
गन्धवद्रुधिरचन्दनोक्षिता
जीवितेशवसतिं जगाम सा॥")

दुःसाधी, [न्] पुं, (दुर्दुष्टं कर्म्म साधयतीति। दुः+साधि+णिनिः।) दौवारिकः। इति शब्दरत्नमाला॥

दुःसाध्यः, त्रि, (दुःखेन साध्यते इति। दुः+साध+ण्यत्।) दुःखनिष्पाद्यः। दुःखेन साध्यते निष्पाद्यते यः॥ (यथा, पञ्चतन्त्रे। १। २५८।

"सतो दुर्गस्थो दुःसाध्यो रिपुर्भवति॥")

दुःस्थः, त्रि, (दुर्दुःखेन दुष्टं वा तिष्ठतीति। स्था+कः।) दुर्गतः। मूर्खः। दुःखेन तिष्ठति यः। इति मेदिनी। थे, ८॥ (यथा, भागवते। १। १६। २४।

"त्वां दुःस्थमूनपदमात्मनि पौरुषेण
सम्पादयन् यदुषु रम्यमबिभ्रदङ्गम्॥")

लुब्धः। इति शब्दार्थकल्पतरुः॥

दुःस्पर्शः, पुं, (दुःखेन स्पृश्यते इति। दुः+स्पृश्+"ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्।" ३।३।१२६। इति कर्म्मणि खल्।) दुरालभा। इत्यमरः।२।४।९१॥ (अस्य पर्य्याया यथा,—

"यासो यवासो दुःस्पर्शो धन्वयासो दुरालभा॥"

इति वैद्यकरत्नमालायाम्॥) लताकरञ्जः। इति राजनिर्घण्टः॥ स्पर्शदुःखे, त्रि। इति मेदिनी। शे, २१॥ (यथा, भागवते। ३। १७। ५।